**संयसश्च । (७२/२५२२)**

सोपसर्गार्थं आरम्भः । सम्पूर्वाच्च [1]यसेः वा श्यन् प्रत्ययो भवति । संयस्यति, संयसति ॥

**स्वादिभ्यः श्नुः । (७३/२५२३)**

'षूञ् [2]अभिषवे' (धा. पा. १२४८), इत्येवमादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति[3] । शपोऽपवादः । सुनोति । सिनोति[4] ॥

**श्रुवः शृ च । (७४/२३८६)**

[5]श्रुवः श्नुप्रत्ययो भवति, [6]तत्संनियोगेन श्रुवः [7]शृ इत्ययमादेशो भवति । शृणोति, शृणुतः, शृण्वन्ति[8] ॥

**अक्षोऽन्यतरस्याम् । (७५/२३३८)**

'अक्षू व्याप्तौ' (धा.पा. ६५४) । भौवादिकः । [9]अस्मादन्यतरस्यां [10]श्नुप्रत्ययो भवति[11] । अक्ष्णोति,[12] अक्षति ॥

**तनूकरणे तक्षः । (७६/२३३९)**

'तक्षू त्वक्षू तनूकरणे' (धा. पा. ६५५, ६५६), [13]अस्मात् तनूकरणे वर्तमानात् अन्यतरस्यां [14]श्नुप्रत्ययो भवति । अनेकार्थत्वाद् धातूनां [15]विशेषणोपादानम् । तक्ष्णोति काष्ठम्, तक्षति काष्ठम् । तनूकरणे इति किम्? संतक्षति वाग्भिः ॥

**तुदादिभ्यः शः । (७७/२५३४)**

'तुद व्यथने' (धा. पा. १२८२) [16]इत्येवमादिभ्यो धातुभ्यः शप्रत्ययो भवति[17] । शपोऽपवादः । [18]शकारः सार्वधातुकसञ्ज्ञार्थः । तुदति[19] । नुदति ॥

**रुधादिभ्यः श्नम् । (७८/२५४३)**

'रुधिर् आवरणे' (धा. पा. १४३९) इत्येवमादिभ्यो धातुभ्यः श्नम् प्रत्ययो भवति[20] । शपोऽपवादः । मकारो देशविध्यर्थः । शकारः 'श्नान् नलोपः' (६.४.२३/२५४४) इति विशेषणार्थः । रुणद्धि । भिनत्ति[21] ॥

---

1. यसो क. 2. अभिषवे नास्ति ह. 3. कर्तृवाचिनि सार्वधातुके परतः इत्यधिकम् ग. ह. 4. चिनोति इत्यधिकम् अ. 5. श्रुवः नास्ति ब. 6. तत्संनियोगे च ड. क. ह. 7. शृभावो अ. 8. भौवादिपाठात् शप् अपि भवति श्रवति इत्यधिकम् ड. 9. तस्मात् फ.ह. 10. अप्रत्ययो भवति ह. 11. शपोऽपवादः इत्यधिकम् ड. 12. भौवादिपाठात् शप् अपि भवति इत्यधिकम् अ. 13. तस्मात् ह. 14. अप्रत्ययो ह. 15. विशेषेणोपादानम् अ. ब. क. ड. 16. तुदादिभ्यः धातुभ्यः ग. 17. कर्तृवाचिनि सार्वधातुके परतः इत्यधिकम् ग. ह. 18. वाक्यमिदं नास्ति फ. 19. तुदतः इत्यधिकम् फ, नुदति नास्ति क. 20. कर्तृवाचिनि सार्वधातुके परतः इत्यधिकम् ह. 21. हिनस्ति इत्यधिकम् ह, श्नमः शबपवादत्वं कथं भिन्नप्रदेशिनः ? नैकदेशितया बाधा किं तर्हि एकप्रयोजनात् इत्यधिकम् अ, छिनत्ति छिन्त्तः छिन्दन्ति इत्यधिकम् फ.